# Code No. 1702

**CLASS : 9th (Ninth)** **Series : 9-April/2021**

*रोल नं०* ☐☐☐☐☐☐☐☐☐☐

## पूर्व मध्यमा (प्रथम वर्ष) संस्कृत साहित्य वेद सिद्धान्त कोड 902 (आर्ष पद्धति)

(Only for Fresh/School Candidates)

*समय : $2\frac{1}{2}$ घण्टे]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **6** हैं।*
- *प्रश्न-पत्र में सबसे ऊपर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/ पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देशः – सर्वे प्रश्नाः समाधेयाः।***

### खण्डः 'क'

### (बहुविकल्पीय-प्रश्नाः)

**1.** अधोलिखितेषु प्रश्नेषु किमप्येकं शुद्धमुत्तरं विचित्य लिखत – $40 \times 1 = 40$

(i) यजुर्वेदे कति अध्यायाः ?

(क) 38 (ख) 41

(ग) 40 (घ) 45

(ii) 'कुर्वन्नेवेह कर्माणि' मन्त्रस्य अग्रिमं पदं लिखत -

(क) एवं त्वयि नान्यथेतः (ख) जिजीविषेच्छतं समाः

(ग) न कर्म लिप्यते नरे (घ) अन्धेन तमसावृताः

(iii) 'सत्यस्यापिहितम्' इति पदस्य को विच्छेदः ?

(क) सत्यस्य + अपिहितम् (ख) सत्यस्य + अपि + हितम्

(ग) सत्यस्यापि + हितम् (घ) सत्य + स्यापिहितम्

(iv) केन प्रकारेण शतं समाः जिजीविषेत् ?

(क) व्यायामं कुर्वन् (ख) भोजनं कुर्वन्

(ग) कर्माणि कुर्वन् (घ) ईश्वरं ध्यायन्

(v) त्रिष्टुप् - छन्दसि कति वर्णाः ?

(क) 32 (ख) 36

(ग) 40 (घ) 44

(vi) के अन्धन्तमः प्रविशन्ति ?

(क) ये मूर्त्तिमुपासते (ख) ये ईश्वरमुपासते

(ग) येऽसम्भूतिमुपासते (घ) ये अलसाः तिष्ठन्ति

(vii) ''यस्तद्वेदोभयं सह'' अत्र उभयपदेन किं गृह्यते ?

(क) द्वे श्लोके (ख) द्वे अविद्ये

(ग) विद्या च अविद्या च (घ) एषु किमपि न

(viii) वेदे कति स्वराः ?

(क) 6 (ख) 7

(ग) 10 (घ) 12

(ix) विराट्-पङ्क्तिछन्दसि कत्यक्षराणि भवन्ति ?

(क) 40 (ख) 42

(ग) 38 (घ) 49

(x) 'क्लिबे' पदस्य कोऽर्थः ?

(क) स्वसामर्थ्याय (ख) परसामर्थ्याय

(ग) सर्वेषां सामर्थ्याय (घ) सुसामर्थ्याय

(xi) ब्रह्माऽपि कं नरं न रञ्जयति ?

(क) ध्यानलवदुर्विदग्धम् (ख) यानलवदुर्विदग्धम्

(ग) ज्ञानलवदुर्विदग्धम् (घ) मानलवदुर्विदग्धम्

(xii) सर्वे गुणाः किमाश्रयन्ति ?

(क) रजतम् (ख) हिरण्यम्

(ग) काञ्चनम् (घ) स्फटिकम्

(xiii) 'वाण्येका' शब्दस्य सन्धिविच्छेदः कः ?

(क) वाणी + एका (ख) वाणी + ऐका

(ग) वाणि + एका (घ) वाणि + ऐका

(xiv) कीदृशाः रससिद्धाः कवीश्वराः जयन्ति ?

(क) अकृतिनः (ख) कुकृतिनः

(ग) सुकृतिनः (घ) विकृतिनः

(xv) 'जम्बूकः' शब्दस्य कोऽर्थः ?

(क) विडालः (ख) शृगालः

(ग) कपोलः (घ) कपालः

(xvi) 'परिवर्तिनि' इति पदे कतमा विभक्ति ?

(क) चतुर्थी (ख) द्वितीया

(ग) प्रथमा (घ) सप्तमी

(xvii) 'भुवनश्रेणिम्' कोऽयं समासः ?

(क) षष्ठी तत्पुरुषः समासः (ख) भुवने श्रेणिम्

(ग) भुवनम् श्रेणिम् (घ) भुवनात् श्रेणिम्

(xviii) धनस्य कियत्यो गतयः ?

(क) 2 (द्वे) (ख) 4 (चतस्रः)

(ग) 3 (तिस्रः) (घ) 6 (षष्ठ)

(xix) 'वस्तूनि' इत्यत्र किं लिङ्गम् ?

(क) पुल्लिङ्गम् (ख) स्त्रीलिङ्गम्

(ग) पुंनपुंसकलिङ्गम् (घ) नपुंसकलिङ्गम्

(xx) धनस्य उत्तमा गतिः का ?

(क) धनस्य भोगः (ख) धनस्य दानम्

(ग) धनस्य नाशः (घ) न कापि

(xxi) अपरीक्षितकारकं कतमं तन्त्रम् ?

(क) प्रथमम् (ख) तृतीयम्

(ग) चतुर्थम् (घ) पञ्चमम्

(xxii) 'सम्प्रधार्य' इत्यस्य पर्यायपदं किम् ?

(क) विचार्य (ख) संगत्य

(ग) सम्भूय (घ) संधृत्य

(xxiii) महाजनो येन गतः सः ........... वाक्यं पूरयत।

(क) राजमार्गः (ख) महामार्गः

(ग) राष्ट्रियराजमार्गः (घ) पन्थाः

(xxiv) 'पञ्चतन्त्रम्' इति पदे कः समासः ?

(क) कर्मधारयः (ख) द्विगुः

(ग) बहुव्रीहिः (घ) द्वन्द्वः

(xxv) 'मनुष्यलोकः' अत्र समासविग्रहः कः ?

(क) मनुष्याणां लोकः (ख) मनुष्यं लोकः

(ग) मनुष्येण लोकः (घ) मनुष्ये लोकः

(xxvi) 'भाषते' इति पदम् -

(क) लट् - प्रथमपुरुष - द्विवचनम् (ख) लोट् - प्र० पु० - एक०

(ग) लट् - प्र० पु० - एक० (घ) लङ् - म० पु० - एक०

(xxvii) 'प्रविश्य' इत्यत्र कः प्रत्ययः ?

(क) क्त्वा (ख) यत्

(ग) क्यष् (घ) ल्यप्

(xxviii) 'धीवरः' इति पदस्य आर्यभाषायामर्थं लिखत ?

(क) मछुआरा (ख) मगरमच्छ

(ग) मछली (घ) नौका

(xxix) 'अयं निजः परो वेति गणना ..........' रिक्तस्थानं पूरयत।

(क) बालकानाम् (ख) महताम्

(ग) स्त्रीणाम् (घ) लघुचेतसाम्

(xxx) के हास्यतां यान्ति ?

(क) बालकाः (ख) विद्वांसः

(ग) मूर्खपण्डिताः (घ) शूद्राः

(xxxi) सत्यार्थप्रकाशे कियन्तः समुल्लासाः सन्ति ?

(क) 14 (ख) 15

(ग) 12 (घ) 11

(xxxii) सत्यार्थप्रकाशस्य द्वितीयसमुल्लासस्य विषयः कः ?

(क) ईश्वरः (ख) राजधर्मः

(ग) शिक्षा (घ) अध्ययनाध्यापनम्

(xxxiii) बालकस्य जन्मनि कः संस्कारः क्रियते ?

(क) नामकरणम् (ख) जातकर्म

(ग) चूडाकर्म (घ) अन्नप्राशनम्

(xxxiv) सत्यार्थप्रकाशे उत्तमशिक्षकाः कति सन्ति ?

(क) 3 (त्रयः) (ख) 4 (चत्वारः)

(ग) 5 (पञ्च) (घ) 6 (षट्)

(xxxv) वाचं कथं वदेत् ?

(क) दृष्टिपूताम् (ख) मनःपूताम्

(ग) वस्त्रपूताम् (घ) सत्यपूताम्

(xxxvi) पृथ्वी कीदृशी ?

(क) चेतना (ख) जडरूपा

(ग) चेतनाचेतना (घ) अन्या एव

(xxxvii) 'न शोभते सभामध्ये हंसमध्ये ............ यथा' - अत्र किमुचितं पदम् ?

(क) पिकः (ख) सिंहः

(ग) शुकः (घ) बकः

(xxxviii) लोके सुखदुःखे पापपुण्ये च कस्य फलम् ?

(क) कर्मणः (ख) बुद्धेः

(ग) बलस्य (घ) उत्साहस्य

(xxxix) 'यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि' इति कुत्रत्येदंवचनम् ?

(क) मनुस्मृतेः (ख) तैत्तिरीयोपनिषदः

(ग) विदुरनीतेः (घ) ऐतरेयोपनिषदः

(xxxx) 'प्रेतः' इत्यस्य कोऽर्थः ?

(क) गतः (ख) निवृत्तः

(ग) मृतकशरीरः (घ) अपगतः

**(लघु-उत्तरीयप्रश्नाः)**

**2.** सत्यार्थप्रकाशानुसारितया विषय*द्वयं* विवेचयत – $2 \times 3 = 6$

(क) बालशिक्षाविषयः

(ख) भूतप्रेतादिसमीक्षा

**(अतिलघु-उत्तरीयप्रश्नाः)**

**3.** निम्नलिखितानां पद्यानां हिन्दीभाषायां सप्रसङ्गं सान्वयार्थं विलिखत – $4 \times 2 = 8$

(क) व्याधितेन सशोकेन चिन्ताग्रस्तेन जन्तुना।
कामार्त्तेनाथ मतेन दृष्टः स्वप्नो निरर्थकः।।

(ख) पतति कदाचिन्नभसः खाते पातालतोऽपि जलमेति।
दैवमचिन्त्यं बलवद्, बलवान्ननु पुरुषकारोऽपि।।

(ग) सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः।
अर्धेन कुरुते कार्यं, सर्वनाशो हि दुःसहः।।

(घ) बुद्धेर्बुद्धिमतां लोके नास्त्यगम्यं हि किञ्चन।
बुद्धया यतो हता नन्दाश्चाणक्येनासिपाणयः।।

**4.** अधोलिखितानां मन्त्राणां पूर्तिर्विधेया – $3 \times 2 = 6$

(क) अनेजदेकं मनसो ...........।

(ख) अन्धन्तमः ..................।

(ग) अन्यदेवाहुर्विद्यायाः ...............।

**खण्डः 'ख'**

**(दीर्घ-उत्तरीयप्रश्नाः)**

**5.** कयोरपि द्वयोर्मन्त्रयोः सप्रसङ्गं व्याख्या विधेया – $2 \times 5 = 10$

(क) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।

(ख) यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विचिकित्सति।।

(ग) सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह।
विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते।।

(घ) हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
योऽसावादित्ये पुरुषः सोऽसावहम्। ओइम् खं ब्रह्म।

**6.** अधस्तनेषु पद्य***द्वयस्य*** सप्रसङ्गं व्याख्यां कुरुत – $2 \times 5 = 10$

(क) साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्।।

(ख) जाड्यं धियो हरति सिञ्चति वाचि सत्यं, मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं, सत्सङ्गतिः कथय किं न करोति पुंसाम्।।

(ग) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः।।

(घ) दौर्मन्त्र्यान्नृपतिर्विनष्यति यतिः सङ्गात् सुतो लालनात्
विप्रोऽनध्ययनात् कुलं कुतनयाच्छीलं खलोपासनात्।
हीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया-
न्मैत्री चाप्रणयात् समृद्धिरनयात् त्यागप्रमादाद्धनम्।।